# ॥ श्री काली सहस्रनाम स्तोत्रम् ॥

# Śrī Kālī Sahasranāma Stotram

## ॥ अथ कालिकाकुलसर्वस्वान्तर्गत-कालीसहस्रनामस्तोत्रम् ॥

**|| atha kālikākulasarvasvāntargata-kālīsahasranāmastotram ||**

## ॥ श्रीगणेशाय नमः ॥

**|| śrīgaṇeśāya namaḥ ||**

## ॥ ॐ श्रीगुरुभ्यो नमः ॥

**|| om śrīgurubhyo namaḥ ||**

कथितोऽयं महामन्त्रः सर्वमन्त्रोत्तमोत्तमः ।

**kathito'yaṁ mahāmantraḥ sarvamantrottamottamaḥ |**

यमासाद्य मयाप्राप्तम्-ऐश्वर्यपदमुत्तमम् ॥ १ ॥

**yamāsādya mayāprāptam-aiśvaryapadamuttamam || 1||**

संयुक्तः परया भक्त्या यथोक्तविधिना भवान् ।

**saṁyuktaḥ parayā bhaktyā yathoktavidhinā bhavān |**

कुरुता मर्चनं देव्याः त्रैलोक्य-विजिगीषया ॥ २ ॥

**kurutā marcanaṁ devyāḥ trailokya-vijigīṣayā || 2||**

श्रीपरशुराम उवाच ।

**śrīparaśurāma uvāca** ।

प्रसन्नो यदि मे देवः परमेशः पुरातनः ।

**prasanno yadi me devaḥ parameśaḥ purātanaḥ** ।

रहस्यं परया देव्याः कृपया कथय प्रभो ॥ ३ ॥

**rahasyaṁ parayā devyāḥ kṛpayā kathaya prabho ।। 3।।**

यथार्चनं विना होमं विना न्यासं विना बलिम् ।

**yathārcanaṁ vinā homaṁ vinā nyāsaṁ vinā balim** ।

विना गन्धं विना पुष्पं विना नित्योदितक्रिया ॥ ४ ॥

**vinā gandhaṁ vinā puṣpaṁ vinā nityoditakriyā ।। 4।।**

प्राणायामं विना ध्यानं विना भूतविशोधनम् ।

**prāṇāyāmaṁ vinā dhyānaṁ vinā bhūtaviśodhanam** ।

विना जाप्यं विना दानं विना काली प्रसीदति ॥ ५ ॥

**vinā jāpyaṁ vinā dānaṁ vinā kālī prasīdati ।। 5।।**

श्रीशङ्कर उवाच ।

**śrīśaṅkara uvāca** ।

पृष्टं त्वयोत्तमं प्राज्ञ भृगुवंशविवर्धनम् ।

**pṛṣṭaṁ tvayottamaṁ prājña bhṛguvaṁśavivardhanam** ।

भक्तानामपि भक्तोऽसि त्वमेवं साधयिष्यसि ॥ ६ ॥

**bhaktānāmapi bhakto'si tvamevaṁ sādhayiṣyasi ।। 6।।**

देवीं दानव-कोटिघ्नीं लीलया रुधिरप्रियाम् ।

**devīṁ dānava-koṭighnīṁ līlayā rudhirapriyām |**

सदा स्तोत्रप्रियामुग्रां काम-कौतुक-लालसाम् ॥ ७ ॥

**sadā stotrapriyāmugrāṁ kāma-kautuka-lālasām || 7||**

सर्वदाऽऽनन्द-हृदयां वासव्यासक्त-मानसाम् ।

**sarvadā''nanda-hṛdayāṁ vāsavyāsakta-mānasām |**

माध्वीक-मत्स्यमांसादि-रागिणीं रुधिर-प्रियाम् ॥ ८ ॥

**mādhvīka-matsyamāṁsādi-rāgiṇīṁ rudhira-priyām || 8||**

श्मशानवासिनीं प्रेतगण-नृत्यमहोत्सवाम् ।

**śmaśānavāsinīṁ pretagaṇa-nṛtyamahotsavām |**

योगप्रभां योगिनीशां योगीन्द्र-हृदये स्थितां ॥ ९ ॥

**yogaprabhāṁ yoginīśāṁ yogīndra-hṛdaye sthitāṁ || 9||**

तामुग्रकालिकां राम प्रसादयितुमर्हसि ।

**tāmugrakālikāṁ rāma prasādayitumarhasi |**

तस्याः स्तोत्रं महापुण्यं स्वयं काल्या प्रकाशितम् ॥ १० ॥

**tasyāḥ stotraṁ mahāpuṇyaṁ svayaṁ kālyā prakāśitam || 10||**

तव तत् कथयिष्यामि श्रुत्वा वत्सावधारय ।

**tava tat kathayiṣyāmi śrutvā vatsāvadhāraya |**

गोपनीयं प्रयत्नेन पठनीयं परात्परम् ॥ ११ ॥

**gopanīyaṁ prayatnena paṭhanīyaṁ parātparam || 11||**

यस्यैककाल-पठनात् सर्वे विघ्नाः समाकुलाः ।

**yasyaikakāla-paṭhanāt sarve vighnāḥ samākulāḥ |**

नश्यन्ति दहने दीप्ते पतङ्गा इव सर्वतः ॥ १२ ॥

**naśyanti dahane dīpte pataṅgā iva sarvataḥ || 12||**

गद्य-पद्यमयी वाणी तस्य गङ्गाप्रवाहवत् ।

**gadya-padyamayī vāṇī tasya gaṅgāpravāhavat |**

तस्य दर्शनमात्रेण वादिनो निष्प्रभा मताः ॥ १३ ॥

**tasya darśanamātreṇa vādino niṣprabhā matāḥ || 13||**

राजानोऽपि च दासत्वं भजन्ति च परेजनाः ।

**rājāno'pi ca dāsatvaṁ bhajanti ca parejanāḥ |**

तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः ॥ १४ ॥

**tasya haste sadaivāsti sarvasiddhirna saṁśayaḥ || 14||**

निशीथे मुक्तये शम्भुर्नग्नः शक्ति-समन्वितः ।

**niśīthe muktaye śambhurnagnaḥ śakti-samanvitaḥ |**

मनसा चिन्तयेत् कालीं महाकालीति लालिताम् ॥ १५ ॥

**manasā cintayet kālīṁ mahākālīti lālitām || 15||**

पठेत् सहस्रनामाख्यं स्तोत्रं मोक्षस्य साधनम् ।

**paṭhet sahasranāmākhyaṁ stotraṁ mokṣasya sādhanam |**

प्रसन्ना कालिका तस्य पुत्रत्वेनानुकम्पते ॥ १६ ॥

**prasannā kālikā tasya putratvenānukampate || 16||**

वेधा ब्रह्मास्मृतेर्ब्रह्म कुसुमैः पूजिता परा ।

**vedhā brahmāsmṛterbrahma kusumaiḥ pūjitā parā |**

प्रसीदति तथा काली यथानेन प्रसीदति ॥ १७ ॥

**prasīdati tathā kālī yathānena prasīdati || 17||**

❋ ❋ ❋

ॐ अस्य श्रीकालिका-सहस्रनाम-स्तोत्रमहामन्त्रस्य ।

**om asya śrīkālikā-sahasranāma-stotramahāmantrasya |**

महाकालभैरव ऋषिः ।

**mahākālabhairava ṛṣiḥ |**

अनुष्टुप् छन्दः ।

**anuṣṭup chandaḥ |**

श्मशान-कालिका देवता ।

**śmaśāna-kālikā devatā |**

महाकालिका-प्रसाद-सिद्ध्यर्थे जपे विनियोगः ॥

**mahākālikā-prasāda-siddhyarthe jape viniyogaḥ ||**

❋ ❋ ❋

# ध्यानम्

## dhyānam

शवारूढां महाभीमां घोरदंष्ट्रां हसन्मुखीम् ।
**śavārūḍhāṁ mahābhīmāṁ ghoradaṁṣṭrāṁ hasanmukhīm ।**
चतुर्भुजां खड्ग-मुण्ड-वराभयकरां शिवाम् ॥
**caturbhujāṁ khaḍga-muṇḍa-varābhayakarāṁ śivām॥**

मुण्डमालाधरां देवीं लोलज्जिह्वां दिगम्बराम् ।
**muṇḍamālādharāṁ devīṁ lolajjihvāṁ digambarām ।**
एवं सञ्चिन्तयेत् कालीं श्मशानालय-वासिनीम् ॥
**evaṁ sañcintayet kālīṁ śmaśānālaya-vāsinīm ॥**

❀ ❀ ❀

# अथ स्तोत्रम्

## atha stotram

॥ ॐ क्रीं महाकाल्यै नमः ॥

**|| om krīṁ mahākālyai namaḥ ||**

ॐ श्मशान-कालिका काली भद्रकाली कपालिनी ।

**om śmaśāna-kālikā kālī bhadrakālī kapālinī |**

गुह्यकाली महाकाली कुरुकुल्ला विरोधिनी ॥ १८ ॥

**guhyakālī mahākālī kurukullā virodhinī || 18||**

कालिका कालरात्रिश्च महाकालनि-तम्बिनी ।

**kālikā kālarātriśca mahākālani-tambinī |**

कालभैरव-भार्या च कुलवर्त्म-प्रकाशिनी ॥ १९ ॥

**kālabhairava-bhāryā ca kulavartma-prakāśinī || 19||**

कामदा कामिनी काम्या कामनीय-स्वभाविनी ।

**kāmadā kāminī kāmyā kāmanīya-svabhāvinī |**

कस्तूरी रस-नीलाङ्गी कुञ्जरेश्वर-गामिनी ॥ २० ॥

**kastūrī rasa-nīlāṅgī kuñjareśvara-gāminī || 20||**

ककार-वर्णसर्वाङ्गी कामिनी कामसुन्दरी ।

**kakāra-varṇasarvāṅgī kāminī kāmasundarī** ।

कामार्ता कामरूपा च कामधेनुः कलावती ॥ २१ ॥

**kāmārtā kāmarūpā ca kāmadhenuḥ kalāvatī || 21||**

कान्ता कामस्वरूपा च कामाख्या कुलपालिनी ।

**kāntā kāmasvarūpā ca kāmākhyā kulapālinī** ।

कुलीना कुलवत्यम्बा दुर्गा दुर्गार्तिनाशिनी ॥ २२ ॥

**kulīnā kulavatyambā durgā durgārtināśinī || 22||**

कौमारी कुलजा कृष्णा कृष्णदेहा कृशोदरी ।

**kaumārī kulajā kṛṣṇā kṛṣṇadehā kṛśodarī** ।

कृशाङ्गी कुलिशाङ्गी च क्रीङ्कारी कमला कला ॥ २३ ॥

**kṛśāṅgī kuliśāṅgī ca krīṅkārī kamalā kalā || 23||**

करालास्या कराली च कुलकान्ताऽपराजिता ।

**karālāsyā karālī ca kulakāntā'parājitā** ।

उग्रा चोग्रप्रभा दीप्ता विप्रचित्ता महाबला ॥ २४ ॥

**ugrā cograprabhā dīptā vipracittā mahābalā || 24||**

नीला घना बलाका च मात्रा मुद्रापिताऽसिता ।

**nīlā ghanā balākā ca mātrā mudrāpitā'sitā** ।

ब्राह्मी नारायणी भद्रा सुभद्रा भक्तवत्सला ॥ २५ ॥

**brāhmī nārāyaṇī bhadrā subhadrā bhaktavatsalā || 25||**

माहेश्वरी च चामुण्डा वाराही नारसिंहिका ।

**māheśvarī ca cāmuṇḍā vārāhī nārasiṁhikā |**

वज्राङ्गी वज्र-कङ्काली नृमुण्ड-स्रग्विणी शिवा ॥ २६ ॥

**vajrāṅgī vajra-kaṅkālī nṛmuṇḍa-sragviṇī śivā || 26||**

मालिनी नरमुण्डाली गलद्-रक्त-विभूषणा ।

**mālinī naramuṇḍālī galad-rakta-vibhūṣaṇā |**

रक्त-चन्दन-सिक्ताङ्गी सिन्दूरारुणमस्तका ॥ २७ ॥

**rakta-candana-siktāṅgī sindūrāruṇamastakā || 27||**

घोररूपा घोरदंष्ट्रा घोराघोरतरा शुभा ।

**ghorarūpā ghoradaṁṣṭrā ghorāghoratarā śubhā |**

महादंष्ट्रा महामाया सुदती युगदन्तुरा ॥ २८ ॥

**mahādaṁṣṭrā mahāmāyā sudatī yugadanturā || 28||**

सुलोचना विरूपाक्षी विशालाक्षी त्रिलोचना ।

**sulocanā virūpākṣī viśālākṣī trilocanā |**

शारदेन्दु-प्रसन्नास्या स्फुरत्-स्मेराम्बुजेक्षणा ॥ २९ ॥

**śāradendu-prasannāsyā sphurat-smerāmbujekṣaṇā || 29||**

अट्टहास-प्रसन्नास्या स्मेरवक्त्रा सुभाषिणी ।

**aṭṭahāsa-prasannāsyā smeravaktrā subhāṣiṇī |**

प्रसन्न-पद्मवदना स्मितास्या प्रियभाषिणि ॥ ३० ॥

**prasanna-padmavadanā smitāsyā priyabhāṣiṇi || 30||**

कोटराक्षी कुलश्रेष्ठा महती बहुभाषिणी ।

**koṭarākṣī kulaśreṣṭhā mahatī bahubhāṣiṇī |**

सुमतिः कुमतिश्चण्डा चण्डमुण्डातिवेगिनी ॥ ३१ ॥

**sumatiḥ kumatiścaṇḍā caṇḍamuṇḍātiveginī || 31||**

प्रचण्डा चण्डिका चण्डी चर्चिका चण्ड-वेगिनी ।

**pracaṇḍā caṇḍikā caṇḍī carcikā caṇḍa-veginī |**

सुकेशी मुक्तकेशी च दीर्घकेशी महत्कचा ॥ ३२ ॥

**sukeśī muktakeśī ca dīrghakeśī mahatkacā || 32||**

प्रेतदेहा कर्णपूरा प्रेतपाणि-सुमेखला ।

**pretadehā karṇapūrā pretapāṇi-sumekhalā |**

प्रेतासना प्रियप्रेता प्रेतभूमि-कृतालया ॥ ३३ ॥

**pretāsanā priyapretā pretabhūmi-kṛtālayā || 33||**

श्मशानवासिनी पुण्या पुण्यदा कुलपण्डिता ।

**śmaśānavāsinī puṇyā puṇyadā kulapaṇḍitā |**

पुण्यालया पुण्यदेहा पुण्यश्लोकी च पावनी ॥ ३४ ॥

**puṇyālayā puṇyadehā puṇyaślokī ca pāvanī || 34||**

पुत्रा पवित्रा परमा पुरा पुण्य-विभूषणा ।

**putrā pavitrā paramā purā puṇya-vibhūṣaṇā |**

पुण्य-नाम्नी भीतिहरा वरदा खड्ग-पाणिनी ॥ ३५ ॥

**puṇya-nāmnī bhītiharā varadā khaḍga-pāṇinī || 35||**

नृमुण्ड-हस्तशस्ता च छिन्नमस्ता सुनासिका ।

**nṛmuṇḍa-hastaśastā ca chinnamastā sunāsikā |**

दक्षिणा श्यामला श्यामा शान्ता पीनोन्नतस्तनी ॥ ३६ ॥

**dakṣiṇā śyāmalā śyāmā śāntā pīnonnatastanī || 36||**

दिगम्बरा घोररावा सृक्कान्ता रक्तवाहिनी ।

**digambarā ghorarāvā sṛkkāntā raktavāhinī |**

घोररावा शिवा खड्गा विशङ्का मदनातुरा ॥ ३७ ॥

**ghorarāvā śivā khaḍgā viśaṅkā madanāturā || 37||**

मत्ता प्रमत्ता प्रमदा सुधासिन्धु-निवासिनी ।

**mattā pramattā pramadā sudhāsindhu-nivāsinī |**

अतिमत्ता महामत्ता सर्वाकर्षण-कारिणी ॥ ३८ ॥

**atimattā mahāmattā sarvākarṣaṇa-kāriṇī || 38||**

गीतप्रिया वाद्यरता प्रेतनृत्य-परायणा ।

**gītapriyā vādyaratā pretanṛtya-parāyaṇā |**

चतुर्भुजा दशभुजा अष्टादशभुजा तथा ॥ ३९ ॥

**caturbhujā daśabhujā aṣṭādaśabhujā tathā || 39||**

कात्यायनी जगन्माता जगती परमेश्वरी ।

**kātyāyanī jaganmātā jagatī parameśvarī |**

जगद्बन्धुर्-जगद्धात्री जगदानन्द-कारिणी ॥ ४० ॥

**jagadbandhur-jagaddhātrī jagadānanda-kāriṇī || 40||**

जन्ममयी हैमवती महामाया महामहा ।

**janmamayī haimavatī mahāmāyā mahāmahā ।**

नागयज्ञोपवीताङ्गी नागिनी नागशायिनी ॥ ४१ ॥

**nāgayajñopavītāṅgī nāginī nāgaśāyinī ।। 41।।**

नागकन्या देवकन्या गन्धर्वी किन्नरेश्वरी ।

**nāgakanyā devakanyā gandharvī kinnareśvarī ।**

मोहरात्री महारात्री दारुणा भासुराम्बरा ॥ ४२ ॥

**moharātrī mahārātrī dāruṇā bhāsurāmbarā ।। 42।।**

विद्याधरी वसुमती यक्षिणी योगिनी जरा ।

**vidyādharī vasumatī yakṣiṇī yoginī jarā ।**

राक्षसी डाकिनी वेदमयी वेद-विभूषणा ॥ ४३ ॥

**rākṣasī ḍākinī vedamayī veda-vibhūṣaṇā ।। 43।।**

श्रुतिः स्मृतिर्महाविद्या गुह्यविद्या पुरातनी ।

**śrutiḥ smṛtirmahāvidyā guhyavidyā purātanī ।**

चिन्त्याऽचिन्त्या स्वधा स्वाहा निद्रा तन्द्रा च पार्वती ॥ ४४ ॥

**cintyā'cintyā svadhā svāhā nidrā tandrā ca pārvatī ।। 44।।**

अपर्णा निश्चला लोला सर्वविद्या तपस्विनी ।

**aparṇā niścalā lolā sarvavidyā tapasvinī ।**

गङ्गा काशी शची सीता सती सत्यपरायणा ॥ ४५ ॥

**gaṅgā kāśī śacī sītā satī satyaparāyaṇā ।। 45।।**

नीतिस्-सुनीतिस्-सुरुचिस्-तुष्टिः पुष्टिर्-धृतिः क्षमा ।

**nītis-sunītis-surucis-tuṣṭiḥ puṣṭir-dhṛtiḥ kṣamā |**

वाणी बुद्धिर्-महालक्ष्मीर्-लक्ष्मीर्-नीलसरस्वती ॥ ४६ ॥

**vāṇī buddhir-mahālakṣmīr-lakṣmīr-nīlasarasvatī || 46||**

स्रोतस्वती सरस्वती मातङ्गी विजया जया ।

**srotasvatī sarasvatī mātaṅgī vijayā jayā |**

नदी सिन्धुः सर्वमयी तारा शून्य-निवासिनी ॥ ४७ ॥

**nadī sindhuḥ sarvamayī tārā śūnya-nivāsinī || 47||**

शुद्धा तरङ्गिणी मेधा लाकिनी बहुरूपिणी ।

**śuddhā taraṅgiṇī medhā lākinī bahurūpiṇī |**

स्थूला सूक्ष्मा सूक्ष्मतरा भगवत्यनु-रूपिणी ॥ ४८ ॥

**sthūlā sūkṣmā sūkṣmatarā bhagavatyanu-rūpiṇī || 48||**

परमाणु-स्वरूपा च चिदानन्द-स्वरूपिणी ।

**paramāṇu-svarūpā ca cidānanda-svarūpiṇī |**

सदानन्दमयी सत्या सर्वानन्द-स्वरूपिणी ॥ ४९ ॥

**sadānandamayī satyā sarvānanda-svarūpiṇī || 49||**

सुनन्दा नन्दिनी स्तुत्या स्तवनीय-स्वभाविनी ।

**sunandā nandinī stutyā stavanīya-svabhāvinī |**

रङ्गिणी टङ्किनी चित्रा विचित्रा चित्ररूपिणी ॥ ५० ॥

**raṅgiṇī ṭaṅkinī citrā vicitrā citrarūpiṇī || 50||**

पद्मा पद्मालया पद्ममुखी पद्मविभूषणा ।

**padmā padmālayā padmamukhī padmavibhūṣaṇā ।**

डाकिनी शाकिनी क्षान्ता राकिणी रुधिरप्रिया ॥ ५१ ॥

**ḍākinī śākinī kṣāntā rākiṇī rudhirapriyā ।। 51।।**

भ्रान्तिर्भवानी रुद्राणी मृडानी शत्रुमर्दिनी ।

**bhrāntirbhavānī rudrāṇī mṛḍānī śatrumardinī ।**

उपेन्द्राणी महेन्द्राणी ज्योत्स्ना चन्द्रस्वरूपिणी ॥ ५२ ॥

**upendrāṇī mahendrāṇī jyotsnā candrasvarūpiṇī ।। 52।।**

सूर्यात्मिका रुद्रपत्नी रौद्री स्त्री प्रकृतिः पुमान् ।

**sūryātmikā rudrapatnī raudrī strī prakṛtiḥ pumān ।**

शक्तिर्-मुक्तिर्-मतिर्-माता भक्तिर्-मुक्तिः पतिव्रता ॥ ५३ ॥

**śaktir-muktir-matir-mātā bhaktir-muktiḥ pativratā ।। 53।।**

सर्वेश्वरी सर्वमाता शर्वाणी हरवल्लभा ।

**sarveśvarī sarvamātā śarvāṇī haravallabhā ।**

सर्वज्ञा सिद्धिदा सिद्धा भव्या भाव्या भयापहा ॥ ५४ ॥

**sarvajñā siddhidā siddhā bhavyā bhāvyā bhayāpahā ।। 54।।**

कर्त्री हर्त्री पालयित्री शर्वरी तामसी दया ।

**kartrī hartrī pālayitrī śarvarī tāmasī dayā ।**

तमिस्रा तामसी स्थाणुः स्थिरा धीरा तपस्विनी ॥ ५५ ॥

**tamisrā tāmasī sthāṇuḥ sthirā dhīrā tapasvinī ।। 55।।**

चार्वङ्गी चञ्चला लोलजिह्वा चारुचरित्रिणी ।

**cārvaṅgī cañcalā lolajihvā cārucaritriṇī |**

त्रपा त्रपावती लज्जा विलज्जा हरयौवती ॥ ५६ ॥

**trapā trapāvatī lajjā vilajjā harayauvatī || 56||**

सत्यवती धर्मनिष्ठा श्रेष्ठा निष्ठुर-वादिनी ।

**satyavatī dharmaniṣṭhā śreṣṭhā niṣṭhura-vādinī |**

गरिष्ठा दुष्ट-संहर्त्री विशिष्टा श्रेयसी घृणा ॥ ५७ ॥

**gariṣṭhā duṣṭa-saṁhartrī viśiṣṭā śreyasī ghṛṇā || 57||**

भीमा भयानका भीम-नादिनी भीः प्रभावती ।

**bhīmā bhayānakā bhīma-nādinī bhīḥ prabhāvatī |**

वागीश्वरी श्रीर्यमुना यज्ञकर्त्री यजुःप्रिया ॥ ५८ ॥

**vāgīśvarī śrīryamunā yajñakartrī yajuḥpriyā || 58||**

ऋक्सामाथर्व-निलया रागिणी शोभनासुरा ।

**ṛksāmātharva-nilayā rāgiṇī śobhanāsurā |**

कलकण्ठी कम्बुकण्ठी वेणुवीणा-परायणा ॥ ५९ ॥

**kalakaṇṭhī kambukaṇṭhī veṇuvīṇā-parāyaṇā || 59||**

वंशिनी वैष्णवी स्वच्छा धात्री त्रिजगदीश्वरी ।

**vaṁśinī vaiṣṇavī svacchā dhātrī trijagadīśvarī |**

मधुमती कुण्डलिनी ऋद्धिः शुद्धिः शुचिस्मिता ॥ ६० ॥

**madhumatī kuṇḍalinī ṛddhiḥ śuddhiḥ śucismitā || 60||**

रम्भोर्वशी रती रामा रोहिणी रेवती मखा ।

**rambhorvaśī ratī rāmā rohiṇī revatī makhā ।**

शङ्खिनी चक्रिणी कृष्णा गदिनी पद्मिनी तथा ॥ ६१ ॥

**śaṅkhinī cakriṇī kṛṣṇā gadinī padminī tathā ।। 61।।**

शूलिनी परिघास्त्रा च पाशिनी शार्ङ्गपाणिनी ।

**śūlinī parighāstrā ca pāśinī śārṅgapāṇinī ।**

पिनाकधारिणी धूम्रा सुरभी वनमालिनी ॥ ६२ ॥

**pinākadhāriṇī dhūmrā surabhī vanamālinī ।। 62।।**

रथिनी समरप्रीता वेगिनी रण-पण्डिता ।

**rathinī samaraprītā veginī raṇa-paṇḍitā ।**

जटिनी वज्रिणी नीला लावण्याम्बुद-चन्द्रिका ॥ ६३ ॥

**jaṭinī vajriṇī nīlā lāvaṇyāmbuda-candrikā ।। 63।।**

बलिप्रिया सदापूज्या दैत्येन्द्रमथिनी तथा ।

**balipriyā sadāpūjyā daityendramathinī tathā ।**

महिषासुर-संहर्त्री कामिनी रक्तदन्तिका ॥ ६४ ॥

**mahiṣāsura-saṁhartrī kāminī raktadantikā ।। 64।।**

रक्तपा रुधिराक्ताङ्गी रक्त-खर्पर-धारिणी ।

**raktapā rudhirāktāṅgī rakta-kharpara-dhāriṇī ।**

रक्तप्रिया मांसरुचिर्-वासवासक्त-मानसा ॥ ६५ ॥

**raktapriyā māṁsarucir-vāsavāsakta-mānasā ।। 65।।**

गलच्छोणित-मुण्डाली कण्ठमाला विभूषणा ।

**galacchoṇita-muṇḍālī kaṇṭhamālā vibhūṣaṇā ǀ**

शवासना चितान्तस्था महेशी वृषवाहिनी ॥ ६६ ॥

**śavāsanā citāntasthā maheśī vṛṣavāhinī ǀǀ 66ǀǀ**

व्याघ्रत्वगम्बरा चीनचैलिनी सिंहवाहिनी ।

**vyāghratvagambarā cīnacailinī siṁhavāhinī ǀ**

वामदेवी महादेवी गौरी सर्वज्ञभामिनी ॥ ६७ ॥

**vāmadevī mahādevī gaurī sarvajñabhāminī ǀǀ 67ǀǀ**

बालिका तरुणी वृद्धा वृद्धमाता जरातुरा ।

**bālikā taruṇī vṛddhā vṛddhamātā jarāturā ǀ**

सुभ्रूर्विलासिनी ब्रह्मवादिनी ब्राह्मणी सती ॥ ६८ ॥

**subhrūrvilāsinī brahmavādinī brāhmaṇī satī ǀǀ 68ǀǀ**

सुप्तवती चित्रलेखा लोपामुद्रा सुरेश्वरी ।

**suptavatī citralekhā lopāmudrā sureśvarī ǀ**

अमोघाऽरुन्धती तीक्ष्णा भोगवत्यनु-रागिणी ॥ ६९ ॥

**amoghā'rundhatī tīkṣṇā bhogavatyanu-rāgiṇī ǀǀ 69ǀǀ**

मन्दाकिनी मन्दहासा ज्वाला मुख्यऽसुरान्तका ।

**mandākinī mandahāsā jvālā mukhya'surāntakā ǀ**

मानदा मानिनी मान्या माननीया मदातुरा ॥ ७० ॥

**mānadā māninī mānyā mānanīyā madāturā ǀǀ 70ǀǀ**

मदिरा मेदुरोन्मादा मेध्या साध्या प्रसादिनी ।

**madirā meduronmādā medhyā sādhyā prasādinī ।**

सुमध्याऽनन्त-गुणिनी सर्व-लोकोत्तमोत्तमा ॥ ७१ ॥

**sumadhyā'nanta-guṇinī sarva-lokottamottamā || 71||**

जयदा जित्वरी जैत्री जयश्रीर्-जयशालिनी ।

**jayadā jitvarī jaitrī jayaśrīr-jayaśālinī ।**

सुखदा शुभदा सत्या सभा सङ्क्षोभकारिणी ॥ ७२ ॥

**sukhadā śubhadā satyā sabhā saṅkṣobhakāriṇī || 72||**

शिवदूती भूतिमती विभूतिर्-भूषणानना ।

**śivadūtī bhūtimatī vibhūtir-bhūṣaṇānanā ।**

कौमारी कुलजा कुन्ती कुलस्त्री कुलपालिका ॥ ७३ ॥

**kaumārī kulajā kuntī kulastrī kulapālikā || 73||**

कीर्तिर्यशस्विनी भूषा भूष्ठा भूतपतिप्रिया ।

**kīrtiryaśasvinī bhūṣā bhūṣṭhā bhūtapatipriyā ।**

सुगुणा निर्गुणाऽधिष्ठा निष्ठा काष्ठा प्रकाशिनी ॥ ७४ ॥

**suguṇā nirguṇā'dhiṣṭhā niṣṭhā kāṣṭhā prakāśinī || 74||**

धनिष्ठा धनदा धान्या वसुधा सुप्रकाशिनी ।

**dhaniṣṭhā dhanadā dhānyā vasudhā suprakāśinī ।**

उर्वी गुर्वी गुरुश्रेष्ठा षड्गुणा त्रिगुणात्मिका ॥ ७५ ॥

**urvī gurvī guruśreṣṭhā ṣaḍguṇā triguṇātmikā || 75||**

राज्ञामाज्ञा महाप्राज्ञा सुगुणा निर्गुणात्मिका ।

**rājñāmājñā mahāprājñā suguṇā nirguṇātmikā ।**

महाकुलीना निष्कामा सकामा कामजीवना ॥ ७६ ॥

**mahākulīnā niṣkāmā sakāmā kāmajīvanā ॥ 76॥**

कामदेवकला रामाऽभिरामा शिवनर्तकी ।

**kāmadevakalā rāmā'bhirāmā śivanartakī ।**

चिन्तामणिः कल्पलता जाग्रती दीनवत्सला ॥ ७७ ॥

**cintāmaṇiḥ kalpalatā jāgratī dīnavatsalā ॥ 77॥**

कार्तिकी कृत्तिका कृत्या अयोध्या विषमा समा ।

**kārtikī kṛttikā kṛtyā ayodhyā viṣamā samā ।**

सुमन्त्रा मन्त्रिणी घूर्णा ह्लादिनी क्लेशनाशिनी ॥ ७८ ॥

**sumantrā mantriṇī ghūrṇā hlādinī kleśanāśinī ॥ 78॥**

त्रैलोक्यजननी हृष्टा निर्मांसामल-रूपिणी ।

**trailokyajananī hṛṣṭā nirmāṁsāmala-rūpiṇī ।**

तडागनिम्न-जठरा शुष्क-मांसास्थिमालिनी ॥ ७९ ॥

**taḍāganimna-jaṭharā śuṣka-māṁsāsthimālinī ॥ 79॥**

अवन्ती मधुरा हृद्या त्रैलोक्या पावनक्षमा ।

**avantī madhurā hṛdyā trailokyā pāvanakṣamā ।**

व्यक्ताऽव्यक्ताऽनेकमूर्ती शारभी भीमनादिनी ॥ ८० ॥

**vyaktā'vyaktā'nekamūrtī śārabhī bhīmanādinī ॥ 80॥**

क्षेमङ्करी शाङ्करी च सर्व-सम्मोहकारिणी ।
**kṣemaṅkarī śāṅkarī ca sarva-sammohakāriṇī |**
ऊर्द्ध्व-तेजस्विनी क्लिन्ना महातेजस्विनी तथा ॥ ८१ ॥
**ūrddhva-tejasvinī klinnā mahātejasvinī tathā || 81||**

अद्वैता योगिनी पूज्या सुरभी सर्वमङ्गला ।
**advaitā yoginī pūjyā surabhī sarvamaṅgalā |**
सर्वप्रियङ्करी भोग्या धनिनी पिशिताशना ॥ ८२ ॥
**sarvapriyaṅkarī bhogyā dhaninī piśitāśanā || 82||**

भयङ्करी पापहरा निष्कलङ्का वशङ्करी ।
**bhayaṅkarī pāpaharā niṣkalaṅkā vaśaṅkarī |**
आशा तृष्णा चन्द्रकला निद्राणा वायुवेगिनी ॥ ८३ ॥
**āśā tṛṣṇā candrakalā nidrāṇā vāyuveginī || 83||**

सहस्रसूर्य-सङ्काशा चन्द्रकोटि-समप्रभा ।
**sahasrasūrya-saṅkāśā candrakoṭi-samaprabhā |**
निशुम्भशुम्भ-संहर्त्री रक्तबीज-विनाशिनी ॥ ८४ ॥
**niśumbhaśumbha-saṁhartrī raktabīja-vināśinī || 84||**

मधुकैटभ-संहर्त्री महिषासुर-घातिनी ।
**madhukaiṭabha-saṁhartrī mahiṣāsura-ghātinī |**
वह्निमण्डल-मध्यस्था सर्व-सत्त्व-प्रतिष्ठिता ॥ ८५ ॥
**vahnimaṇḍala-madhyasthā sarva-sattva-pratiṣṭhitā || 85||**

सर्वाचारवती सर्व-देवकन्याधि-देवता ।

**sarvācāravatī sarva-devakanyādhi-devatā |**

दक्षकन्या दक्षयज्ञ-नाशिनी दुर्गतारिणी ॥ ८६ ॥

**dakṣakanyā dakṣayajña-nāśinī durgatāriṇī || 86||**

इज्या पूज्या विभा भूतिः सत्कीर्तिर्-ब्रह्मचारिणी ।

**ijyā pūjyā vibhā bhūtiḥ satkīrtir-brahmacāriṇī |**

रम्भोरूश्चतुरा राका जयन्ती वरुणा कुहूः ॥ ८७ ॥

**rambhorūścaturā rākā jayantī varuṇā kuhūḥ || 87||**

मनस्विनी देवमाता यशस्या ब्रह्मवादिनी ।

**manasvinī devamātā yaśasyā brahmavādinī |**

सिद्धिदा वृद्धिदा वृद्धिः सर्वाद्या सर्वदायिनी ॥ ८८ ॥

**siddhidā vṛddhidā vṛddhiḥ sarvādyā sarvadāyinī || 88||**

आधार-रूपिणी ध्येया मूलाधार-निवासिनी ।

**ādhāra-rūpiṇī dhyeyā mūlādhāra-nivāsinī |**

आज्ञा प्रज्ञा पूर्णमना चन्द्रमुख्यनु-कूलिनी ॥ ८९ ॥

**ājñā prajñā pūrṇamanā candramukhyanu-kūlinī || 89||**

वावदूका निम्ननाभिः सत्यसन्धा दृढव्रता ।

**vāvadūkā nimnanābhiḥ satyasandhā dṛḍhavratā |**

आन्वीक्षिकी दण्डनीतिस्-त्रयी त्रिदिव-सुन्दरी ॥ ९० ॥

**ānvīkṣikī daṇḍanītis-trayī tridiva-sundarī || 90||**

ज्वालिनी ज्वलिनी शैलतनया विन्ध्यवासिनी ।

**jvālinī jvalinī śailatanayā vindhyavāsinī** ।

प्रत्यया खेचरी धैर्या तुरीया विमलाऽऽतुरा ॥ ९१ ॥

**pratyayā khecarī dhairyā turīyā vimalā"turā || 91||**

प्रगल्भा वारुणी क्षामा दर्शिनी विस्फुलिङ्गिनी ।

**pragalbhā vāruṇī kṣāmā darśinī visphuliṅginī** ।

भक्तिः सिद्धिः सदाप्राप्तिः प्रकाम्या महिमाऽणिमा ॥ ९२ ॥

**bhaktiḥ siddhiḥ sadāprāptiḥ prakāmyā mahimā'ṇimā || 92||**

ईक्षा सिद्धिर्वशित्वा च ईशित्वोर्ध्वनि-वासिनी ।

**īkṣā siddhirvaśitvā ca īśitvordhvani-vāsinī** ।

लघिमा चैव सावित्री गायत्री भुवनेश्वरी ॥ ९३ ॥

**laghimā caiva sāvitrī gāyatrī bhuvaneśvarī || 93||**

मनोहरा चिता दिव्या देव्युदारा मनोरमा ।

**manoharā citā divyā devyudārā manoramā** ।

पिङ्गला कपिला जिह्वा रसज्ञा रसिका रसा ॥ ९४ ॥

**piṅgalā kapilā jihvā rasajñā rasikā rasā || 94||**

सुषुम्नेडा योगवती गान्धारी नवकान्तका ।

**suṣumneḍā yogavatī gāndhārī navakāntakā** ।

पाञ्चाली रुक्मिणी राधा राध्या भामा च राधिका ॥ ९५ ॥

**pāñcālī rukmiṇī rādhā rādhyā bhāmā ca rādhikā || 95||**

अमृता तुलसीवृन्दा कैटभी कपटेश्वरी ।

**amṛtā tulasīvṛndā kaiṭabhī kapaṭeśvarī |**

उग्रचण्डेश्वरी वीरजननी वीरसुन्दरी ॥ ९६ ॥

**ugracaṇḍeśvarī vīrajananī vīrasundarī || 96||**

उग्रतारा यशोदाख्या देवकी देवमानिता ।

**ugratārā yaśodākhyā devakī devamānitā |**

निरञ्जना चित्रदेवी क्रोधिनी कुलदीपिका ॥ ९७ ॥

**nirañjanā citradevī krodhinī kuladīpikā || 97||**

कुलरागीश्वरी ज्वाला मात्रिका द्राविणी द्रवा ।

**kularāgīśvarī jvālā mātrikā drāviṇī dravā |**

योगीश्वरी महामारी भ्रामरी बिन्दु-रूपिणी ॥ ९८ ॥

**yogīśvarī mahāmārī bhrāmarī bindu-rūpiṇī || 98||**

दूती प्राणेश्वरी गुप्ता बहुला डामरी प्रभा ।

**dūtī prāṇeśvarī guptā bahulā ḍāmarī prabhā |**

कुब्जिका ज्ञानिनी ज्येष्ठा भुशुण्डी प्रकटाकृतिः ॥ ९९ ॥

**kubjikā jñāninī jyeṣṭhā bhuśuṇḍī prakaṭākṛtiḥ || 99||**

द्राविणी गोपिनी माया कामबीजेश्वरी प्रिया ।

**drāviṇī gopinī māyā kāmabījeśvarī priyā |**

शाकम्भरी कोकनदा सुसत्या च तिलोत्तमा ॥ १०० ॥

**śākambharī kokanadā susatyā ca tilottamā || 100||**

अमेया विक्रमा क्रूरा सम्यक्छीला त्रिविक्रमा ।

**ameyā vikramā krūrā samyakchīlā trivikramā |**

स्वस्तिर्हव्यवहा प्रीतिरुक्मा धूम्रार्चि-रङ्गदा ॥ १०१ ॥

**svastirhavyavahā prītirukmā dhūmrārci-raṅgadā || 101||**

तपिनी तापिनी विश्वभोगदा धारिणी धरा ।

**tapinī tāpinī viśvabhogadā dhāriṇī dharā |**

त्रिखण्डा रोधिनी वश्या सकला शब्दरूपिणी ॥ १०२ ॥

**trikhaṇḍā rodhinī vaśyā sakalā śabdarūpiṇī || 102||**

बीजरूपा महामुद्रा वशिनी योग-रूपिणी ।

**bījarūpā mahāmudrā vaśinī yoga-rūpiṇī |**

अनङ्ग-कुसुमाऽनङ्ग-मेखलाऽनङ्गरूपिणी ॥ १०३ ॥

**anaṅga-kusumā'naṅga-mekhalā'naṅgarūpiṇī || 103||**

अनङ्गमदनाऽनङ्गरेखाऽनङ्ग-कुशेश्वरी ।

**anaṅgamadanā'naṅgarekhā'naṅga-kuśeśvarī |**

अनङ्ग-मालिनी कामेश्वरी सर्वार्थ-साधिका ॥ १०४ ॥

**anaṅga-mālinī kāmeśvarī sarvārtha-sādhikā || 104||**

सर्वतन्त्रमयी सर्वमोदिन्या नन्दरूपिणी ।

**sarvatantramayī sarvamodinyā nandarūpiṇī |**

वज्रेश्वरी च जयिनी सर्व-दुःख-क्षयङ्करी ॥ १०५ ॥

**vajreśvarī ca jayinī sarva-duḥkha-kṣayaṅkarī || 105||**

षडङ्ग-युवती योगे युक्ता ज्वालांशुमालिनी ।
**ṣaḍaṅga-yuvatī yoge yuktā jvālāṁśumālinī ।**
दुराशया दुराधारा दुर्जया दुर्गरूपिणी ॥ १०६ ॥
**durāśayā durādhārā durjayā durgarūpiṇī ।। 106।।**

दुरन्ता दुष्कृतिहरा दुर्ध्येया दुरतिक्रमा ।
**durantā duṣkṛtiharā durdhyeyā duratikramā ।**
हंसेश्वरी त्रिलोकस्था शाकम्भर्यनु-रागिणी ॥ १०७ ॥
**haṁseśvarī trilokasthā śākambharyanu-rāgiṇī ।। 107।।**

त्रिकोणनिलया नित्या परमामृत-रञ्जिता ।
**trikoṇanilayā nityā paramāmṛta-rañjitā ।**
महाविद्येश्वरी श्वेता भेरुण्डा कुलसुन्दरी ॥ १०८ ॥
**mahāvidyeśvarī śvetā bheruṇḍā kulasundarī ।। 108।।**

त्वरिता भक्तिसंयुक्ता भक्तिवश्या सनातनी ।
**tvaritā bhaktisaṁyuktā bhaktivaśyā sanātanī ।**
भक्तानन्दमयी भक्तभाविता भक्त-शङ्करी ॥ १०९ ॥
**bhaktānandamayī bhaktabhāvitā bhakta-śaṅkarī ।। 109।।**

सर्व-सौन्दर्य-निलया सर्व-सौभाग्यशालिनी ।
**sarva-saundarya-nilayā sarva-saubhāgyaśālinī ।**
सर्व-सम्भोग-भवना सर्व-सौख्यानुरूपिणी ॥ ११० ॥
**sarva-sambhoga-bhavanā sarva-saukhyānurūpiṇī ।। 110।।**

कुमारी पूजनरता कुमारी-व्रतचारिणी ।

**kumārī pūjanaratā kumārī-vratacāriṇī |**

कुमारी-भक्तिसुखिनी कुमारी-रूप-धारिणी ॥ १११ ॥

**kumārī-bhaktisukhinī kumārī-rūpa-dhāriṇī || 111||**

कुमारी-पूजकप्रीता कुमारी-प्रीतिदप्रिया ।

**kumārī-pūjakaprītā kumārī-prītidapriyā |**

कुमारी-सेवकासङ्गा कुमारी-सेवकालया ॥ ११२ ॥

**kumārī-sevakāsaṅgā kumārī-sevakālayā || 112||**

आनन्द-भैरवी बालभैरवी बटु-भैरवी ।

**ānanda-bhairavī bālabhairavī baṭu-bhairavī |**

श्मशान-भैरवी कालभैरवी पुर-भैरवी ॥ ११३ ॥

**śmaśāna-bhairavī kālabhairavī pura-bhairavī || 113||**

महा-भैरवपत्नी च परमानन्द-भैरवी ।

**mahā-bhairavapatnī ca paramānanda-bhairavī |**

सुरानन्द-भैरवी च उन्मादानन्द-भैरवी ॥ ११४ ॥

**surānanda-bhairavī ca unmādānanda-bhairavī || 114||**

यज्ञानन्द-भैरवी च तथा तरुण-भैरवी ।

**yajñānanda-bhairavī ca tathā taruṇa-bhairavī |**

ज्ञानानन्द-भैरवी च अमृतानन्द-भैरवी ॥ ११५ ॥

**jñānānanda-bhairavī ca amṛtānanda-bhairavī || 115||**

महाभयङ्करी तीव्रा तीव्रवेगा तरस्विनी ।

**mahābhayaṅkarī tīvrā tīvravegā tarasvinī |**

त्रिपुरा परमेशानी सुन्दरी पुरसुन्दरी ॥ ११६ ॥

**tripurā parameśānī sundarī purasundarī || 116||**

त्रिपुरेशी पञ्चदशी पञ्चमी पुरवासिनी ।

**tripureśī pañcadaśī pañcamī puravāsinī |**

महासप्तदशी चैव षोडशी त्रिपुरेश्वरी ॥ ११७ ॥

**mahāsaptadaśī caiva ṣoḍaśī tripureśvarī || 117||**

महाङ्कुश-स्वरूपा च महाचक्रेश्वरी तथा ।

**mahāṅkuśa-svarūpā ca mahācakreśvarī tathā |**

नवचक्रेश्वरी चक्रेश्वरी त्रिपुरमालिनी ॥ ११८ ॥

**navacakreśvarī cakreśvarī tripuramālinī || 118||**

राजचक्रेश्वरी राज्ञी महा-त्रिपुरसुन्दरी ।

**rājacakreśvarī rājñī mahā-tripurasundarī |**

सिन्दूरपूर-रुचिरा श्रीमत्-त्रिपुरसुन्दरी ॥ ११९ ॥

**sindūrapūra-rucirā śrīmat-tripurasundarī || 119||**

सर्वाङ्ग-सुन्दरी रक्ता रक्त-वस्त्रोत्तरीयका ।

**sarvāṅga-sundarī raktā rakta-vastrottarīyakā |**

यवायावक-सिन्दूर-रक्तचन्दन-धारिणी ॥ १२० ॥

**yavāyāvaka-sindūra-raktacandana-dhāriṇī || 120||**

यवायावक-सिन्दूर-रक्तचन्दन-रूपधृक् ।
**yavāyāvaka-sindūra-raktacandana-rūpadhṛk |**
चमरी बालकुटिला निर्मला श्याम-केशिनी ॥ १२१ ॥
**camarī bālakuṭilā nirmalā śyāma-keśinī || 121||**

वज्र-मौक्तिक-रत्नाढ्या किरीट-कुण्डलोज्ज्वला ।
**vajra-mauktika-ratnāḍhyā kirīṭa-kuṇḍalojjvalā |**
रत्न-कुण्डल-संयुक्ता स्फुरद्-गण्ड-मनोरमा ॥ १२२ ॥
**ratna-kuṇḍala-saṁyuktā sphurad-gaṇḍa-manoramā || 122||**

कुञ्जरेश्वर-कुम्भोत्थ-मुक्ता-रञ्जित-नासिका ।
**kuñjareśvara-kumbhottha-muktā-rañjita-nāsikā |**
मुक्ता-विद्रुम-माणिक्य-हाराद्यस्तन-मण्डला ॥ १२३ ॥
**muktā-vidruma-māṇikya-hārādyastana-maṇḍalā || 123||**

सूर्य-कान्तेन्दु-कान्ताढ्या स्पर्शाश्म-गल-भूषणा ।
**sūrya-kāntendu-kāntāḍhyā sparśāśma-gala-bhūṣaṇā |**
बीज-पूर-स्फुरद्-बीज-दन्त-पङ्क्तिरनुत्तमा ॥ १२४ ॥
**bīja-pūra-sphurad-bīja-danta-paṅktiranuttamā || 124||**

काम-कोदण्डका भुग्न-भ्रूकटाक्ष-प्रवर्षिणी ।
**kāma-kodaṇḍakā bhugna-bhrūkaṭākṣa-pravarṣiṇī |**
मातङ्ग-कुम्भ-वक्षोजा लसत्-कनक-दक्षिणा ॥ १२५ ॥
**mātaṅga-kumbha-vakṣojā lasat-kanaka-dakṣiṇā || 125||**

मनोज्ञ-शष्कुली-कर्णा हंसी गति-विडम्बिनी ।

**manojña-śaṣkulī-karṇā haṁsī gati-viḍambinī |**

पद्मरागाङ्गद-द्योतद्दोश्चतुष्क-प्रकाशिनी ॥ १२६ ॥

**padmarāgāṅgada-dyotaddoścatuṣka-prakāśinī || 126||**

कर्पूरागरु-कस्तूरी-कुङ्कुमद्रव-लेपिता ।

**karpūrāgaru-kastūrī-kuṅkumadrava-lepitā |**

विचित्र-रत्न-पृथिवी कल्प-शाखितलस्थिता ॥ १२७ ॥

**vicitra-ratna-pṛthivī kalpa-śākhitalasthitā || 127||**

रत्नदीप-स्फुरद्-रत्नसिंहासन-निवासिनी ।

**ratnadīpa-sphurad-ratnasiṁhāsana-nivāsinī |**

षट्चक्र-भेदनकरी परमानन्द-रूपिणी ॥ १२८ ॥

**ṣaṭcakra-bhedanakarī paramānanda-rūpiṇī || 128||**

सहस्रदल-पद्मान्ता चन्द्रमण्डल-वर्तिनी ।

**sahasradala-padmāntā candramaṇḍala-vartinī |**

ब्रह्मरूपा शिव-क्रोडा नाना-सुख-विलासिनी ॥ १२९ ॥

**brahmarūpā śiva-kroḍā nānā-sukha-vilāsinī || 129||**

हर-विष्णु-विरिञ्चेन्द्र-ग्रहनायक-सेविता ।

**hara-viṣṇu-viriñcendra-grahanāyaka-sevitā |**

शिवा शैवा च रुद्राणी तथैव-शिव-नादिनी ॥ १३० ॥

**śivā śaivā ca rudrāṇī tathaiva-śiva-nādinī || 130||**

महादेव-प्रिया देवी तथैवानङ्ग-मेखला ।
**mahādeva-priyā devī tathaivānaṅga-mekhalā |**
डाकिनी योगिनी चैव तथोपयोगिनी मता ॥ १३१ ॥
**ḍākinī yoginī caiva tathopayoginī matā || 131||**

माहेश्वरी वैष्णवी च भ्रामरी शिवरूपिणी ।
**māheśvarī vaiṣṇavī ca bhrāmarī śivarūpiṇī |**
अलम्बुसा भोगवती क्रोधरूपा सुमेखला ॥ १३२ ॥
**alambusā bhogavatī krodharūpā sumekhalā || 132||**

गान्धारी हस्तिजिह्वा च इडा चैव शुभङ्करी ।
**gāndhārī hastijihvā ca iḍā caiva śubhaṅkarī |**
पिङ्गला दक्षसूत्री च सुषुम्ना चैव गान्धिनी ॥ १३३ ॥
**piṅgalā dakṣasūtrī ca suṣumnā caiva gāndhinī || 133||**

भगात्मिका भगाधारा भगेशी भगरूपिणी ।
**bhagātmikā bhagādhārā bhageśī bhagarūpiṇī |**
लिङ्गाख्या चैव कामेशी त्रिपुरा भैरवी तथा ॥ १३४ ॥
**liṅgākhyā caiva kāmeśī tripurā bhairavī tathā || 134||**

लिङ्गगीतिस्-सुगीतिश्च लिङ्गस्था लिङ्गरूपधृक् ।
**liṅgagītis-sugītiśca liṅgasthā liṅgarūpadhṛk |**
लिङ्गमाला लिङ्गभवा लिङ्गालिङ्गा च पावकी ॥ १३५ ॥
**liṅgamālā liṅgabhavā liṅgāliṅgā ca pāvakī || 135||**

भगवती कौशिकी च प्रेमरूपा प्रियंवदा ।

**bhagavatī kauśikī ca premarūpā priyaṁvadā ।**

गृध्ररूपी शिवारूपा चक्रेशी चक्र-रूपधृक् ॥ १३६ ॥

**gṛdhrarūpī śivārūpā cakreśī cakra-rūpadhṛk ।। 136।।**

आत्मयोनिर्-ब्रह्मयोनिर्-जगद्योनिरयोनिजा ।

**ātmayonir-brahmayonir-jagadyonirayonijā ।**

भगरूपा भगस्थात्री भगिनी भगमालिनी ॥ १३७ ॥

**bhagarūpā bhagasthātrī bhaginī bhagamālinī ।। 137।।**

भगात्मिका भगाधारा रूपिणी भगशालिनी ।

**bhagātmikā bhagādhārā rūpiṇī bhagaśālinī ।**

लिङ्गाभिधायिनी लिङ्गप्रिया लिङ्ग-निवासिनी ॥ १३८ ॥

**liṅgābhidhāyinī liṅgapriyā liṅga-nivāsinī ।। 138।।**

लिङ्गस्था लिङ्गिनी लिङ्ग-रूपिणी लिङ्ग-सुन्दरी ।

**liṅgasthā liṅginī liṅga-rūpiṇī liṅga-sundarī ।**

लिङ्गगीतिर्-महाप्रीतिर्-भगगीतिर्-महासुखा ॥ १३९ ॥

**liṅgagītir-mahāprītir-bhagagītir-mahāsukhā ।। 139।।**

लिङ्ग-नाम-सदानन्दा भग-नाम-सदारतिः ।

**liṅga-nāma-sadānandā bhaga-nāma-sadāratiḥ ।**

भग-नाम-सदानन्दा लिङ्ग-नाम-सदारतिः ॥ १४० ॥

**bhaga-nāma-sadānandā liṅga-nāma-sadāratiḥ ।। 140।।**

लिङ्गमाल-कराभूषा भगमाला-विभूषणा ।
**liṅgamāla-karābhūṣā bhagamālā-vibhūṣaṇā ।**
भग-लिङ्गामृतवृता भग-लिङ्गामृतात्मिका ॥ १४१ ॥
**bhaga-liṅgāmṛtavṛtā bhaga-liṅgāmṛtātmikā ।। 141।।**

भगलिङ्गार्चन-प्रीता भगलिङ्ग-स्वरूपिणी ।
**bhagaliṅgārcana-prītā bhagaliṅga-svarūpiṇī ।**
भगलिङ्ग-स्वरूपा च भगलिङ्ग-सुखावहा ॥ १४२ ॥
**bhagaliṅga-svarūpā ca bhagaliṅga-sukhāvahā ।। 142।।**

स्वयम्भू-कुसुम-प्रीता स्वयम्भू-कुसुमार्चिता ।
**svayambhū-kusuma-prītā svayambhū-kusumārcitā ।**
स्वयम्भू-कुसुम-प्राणा स्वयम्भू-कुसुमोत्थिता ॥ १४३ ॥
**svayambhū-kusuma-prāṇā svayambhū-kusumotthitā ।। 143।।**

स्वयम्भू-कुसुम-स्नाता स्वयम्भू-पुष्प-तर्पिता ।
**svayambhū-kusuma-snātā svayambhū-puṣpa-tarpitā ।**
स्वयम्भू-पुष्प-घटिता स्वयम्भू-पुष्प-धारिणी ॥ १४४ ॥
**svayambhū-puṣpa-ghaṭitā svayambhū-puṣpa-dhāriṇī ।। 144।।**

स्वयम्भू-पुष्प-तिलका स्वयम्भू-पुष्प-चर्चिता ।
**svayambhū-puṣpa-tilakā svayambhū-puṣpa-carcitā ।**
स्वयम्भू-पुष्पनिरता स्वयम्भू-कुसुमाग्रहा ॥ १४५ ॥
**svayambhū-puṣpaniratā svayambhū-kusumāgrahā ।। 145।।**

स्वयम्भू-पुष्प-यज्ञेशा स्वयम्भू-कुसुमालिका ।

**svayambhū-puṣpa-yajñeśā svayambhū-kusumālikā |**

स्वयम्भू-पुष्प-निचिता स्वयम्भू-कुसुमार्चिता ॥ १४६ ॥

**svayambhū-puṣpa-nicitā svayambhū-kusumārcitā || 146||**

स्वयम्भू-कुसुमा दान-लालसोन्मत्तमानसा ।

**svayambhū-kusumā dāna-lālasonmattamānasā |**

स्वयम्भू-कुसुमानन्द-लहरी स्निग्धदेहिनी ॥ १४७ ॥

**svayambhū-kusumānanda-laharī snigdhadehinī || 147||**

स्वयम्भू-कुसुमाधारा स्वयम्भू-कुसुमाकुला ।

**svayambhū-kusumādhārā svayambhū-kusumākulā |**

स्वयम्भू-पुष्प-निलया स्वयम्भू-पुष्प-वासिनी ॥ १४८ ॥

**svayambhū-puṣpa-nilayā svayambhū-puṣpa-vāsinī || 148||**

स्वयम्भू-कुसुमास्निग्धा स्वयम्भू-कुसुमात्मिका ।

**svayambhū-kusumāsnigdhā svayambhū-kusumātmikā |**

स्वयम्भू-पुष्पकरिणी स्वयम्भू-पुष्प-मालिका ॥ १४९ ॥

**svayambhū-puṣpakariṇī svayambhū-puṣpa-mālikā || 149||**

स्वयम्भू-कुसुमन्यासा स्वयम्भू-कुसुम-प्रभा ।

**svayambhū-kusumanyāsā svayambhū-kusuma-prabhā |**

स्वयम्भू-कुसुमज्ञाना स्वयम्भू-पुष्प-भोगिनी ॥ १५० ॥

**svayambhū-kusumajñānā svayambhū-puṣpa-bhoginī || 150||**

स्वयम्भू-कुसुमोल्लासा स्वयम्भू-पुष्प-वर्षिणी ।

**svayambhū-kusumollāsā svayambhū-puṣpa-varṣiṇī ।**

स्वयम्भू-कुसुमानन्दा स्वयम्भू-पुष्प-पुष्पिणी ॥ १५१ ॥

**svayambhū-kusumānandā svayambhū-puṣpa-puṣpiṇī ।। 151।।**

स्वयम्भू-कुसुमोत्साहा स्वयम्भू-पुष्प-रूपिणी ।

**svayambhū-kusumotsāhā svayambhū-puṣpa-rūpiṇī ।**

स्वयम्भू-कुसुमोन्मादा स्वयम्भू-पुष्प-सुन्दरी ॥ १५२ ॥

**svayambhū-kusumonmādā svayambhū-puṣpa-sundarī ।। 152।।**

स्वयम्भू-कुसुमाराध्या स्वयम्भू-कुसुमोद्भवा ।

**svayambhū-kusumārādhyā svayambhū-kusumodbhavā ।**

स्वयम्भू-कुसुमाव्यग्रा स्वयम्भू-पुष्प-पूर्णिता ॥ १५३ ॥

**svayambhū-kusumāvyagrā svayambhū-puṣpa-pūrṇitā ।। 153।।**

स्वयम्भू-पूजकप्राज्ञा स्वयम्भू-होतृमात्रिका ।

**svayambhū-pūjakaprājñā svayambhū-hotṛmātrikā ।**

स्वयम्भू-दातृरक्षित्री स्वयम्भू-भक्त-भाविका ॥ १५४ ॥

**svayambhū-dātṛrakṣitrī svayambhū-bhakta-bhāvikā ।। 154।।**

स्वयम्भू-कुसुमप्रीता स्वयम्भू-पूजकप्रिया ।

**svayambhū-kusumaprītā svayambhū-pūjakapriyā ।**

स्वयम्भू-वन्दकाधारा स्वयम्भू-निन्दकान्तका ॥ १५५ ॥

**svayambhū-vandakādhārā svayambhū-nindakāntakā ।। 155।।**

स्वयम्भू-प्रदसर्वस्वा स्वयम्भू-प्रदपुत्रिणी ।

**svayambhū-pradasarvasvā svayambhū-pradaputriṇī ।**

स्वयम्भू-प्रदसस्मेरा स्वयम्भूतशरीरिणी ॥ १५६ ॥

**svayambhū-pradasasmerā svayambhūtaśarīriṇī ।। 156।।**

सर्व-लोकोद्भवप्रीता सर्व-कालोद्भवात्मिका ।

**sarva-lokodbhavaprītā sarva-kālodbhavātmikā ।**

सर्व-कालोद्भवोद्भावा सर्व-कालोद्भवोद्भवा ॥ १५७ ॥

**sarva-kālodbhavodbhāvā sarva-kālodbhavodbhavā ।। 157।।**

कुन्द-पुष्पसमाप्रीतिः कुन्द-पुष्पसमारतिः ।

**kunda-puṣpasamāprītiḥ kunda-puṣpasamāratiḥ ।**

कुन्द-गोलोद्भवप्रीता कुन्द-गोलोद्भवात्मिका ॥ १५८ ॥

**kunda-golodbhavaprītā kunda-golodbhavātmikā ।। 158।।**

स्वयम्भूर्वा शिवा शक्ता पाविनी लोकपाविनी ।

**svayambhūrvā śivā śaktā pāvinī lokapāvinī ।**

कीर्तिर्यशस्विनी मेधा विमेधा सुरसुन्दरी ॥ १५९ ॥

**kīrtiryaśasvinī medhā vimedhā surasundarī ।। 159।।**

अश्विनी कृत्तिका पुष्या तेजस्वी चन्द्रमण्डला ।

**aśvinī kṛttikā puṣyā tejasvī candramaṇḍalā ।**

सूक्ष्मा सूक्ष्मप्रदा सूक्ष्मासूक्ष्मभय-विनाशिनी ॥ १६० ॥

**sūkṣmā sūkṣmapradā sūkṣmāsūkṣmabhaya-vināśinī ।। 160।।**

वरदाऽभयदा चैव मुक्तिबन्ध-विनाशिनी ।

**varadā'bhayadā caiva muktibandha-vināśinī |**

कामुकी कामदा क्षान्ता कामाख्या कुलसुन्दरी ॥ १६१ ॥

**kāmukī kāmadā kṣāntā kāmākhyā kulasundarī || 161||**

सुखदा दुःखदा मोक्षा मोक्षदार्थ-प्रकाशिनी ।

**sukhadā duḥkhadā mokṣā mokṣadārtha-prakāśinī |**

दुष्टादुष्टमती चैव सर्वकार्य-विनाशिनी ॥ १६२ ॥

**duṣṭāduṣṭamatī caiva sarvakārya-vināśinī || 162||**

शुक्रधारा शुक्र-रूपा शुक्र-सिन्धु-निवासिनी ।

**śukradhārā śukra-rūpā śukra-sindhu-nivāsinī |**

शुक्रालया शुक्र-भोगा शुक्र-पूजा सदारतिः ॥ १६३ ॥

**śukrālayā śukra-bhogā śukra-pūjā sadāratiḥ || 163||**

शुक्रपूज्या शुक्र-होम-सन्तुष्टा शुक्र-वत्सला ।

**śukrapūjyā śukra-homa-santuṣṭā śukra-vatsalā |**

शुक्र-मूर्तिः शुक्र-देहा शुक्र-पूजक-पुत्रिणी ॥ १६४ ॥

**śukra-mūrtiḥ śukra-dehā śukra-pūjaka-putriṇī || 164||**

शुक्रस्था शुक्रिणी शुक्र-संस्पृहा शुक्र-सुन्दरी ।

**śukrasthā śukriṇī śukra-saṁspṛhā śukra-sundarī |**

शुक्र-स्नाता शुक्रकरी शुक्र-सेव्यातिशुक्रिणी ॥ १६५ ॥

**śukra-snātā śukrakarī śukra-sevyātiśukriṇī || 165||**

महाशुक्रा शुक्रभवा शुक्र-वृष्टि-विधायिनी ।

**mahāśukrā śukrabhavā śukra-vṛṣṭi-vidhāyinī |**

शुक्राभिधेया शुक्रार्हा शुक्र-वन्दक-वन्दिता ॥ १६६ ॥

**śukrābhidheyā śukrārhā śukra-vandaka-vanditā || 166||**

शुक्रानन्दकरी शुक्र-सदानन्द-विधायिनी ।

**śukrānandakarī śukra-sadānanda-vidhāyinī |**

शुक्रोत्साहा सदा-शुक्र-पूर्णा शुक्र-मनोरमा ॥ १६७ ॥

**śukrotsāhā sadā-śukra-pūrṇā śukra-manoramā || 167||**

शुक्र-पूजक-सर्वस्था शुक्र-निन्दक-नाशिनी ।

**śukra-pūjaka-sarvasthā śukra-nindaka-nāśinī |**

शुक्रात्मिका शुक्रसम्पच्-छुक्राकर्षण-कारिणी ॥ १६८ ॥

**śukrātmikā śukrasampac-chukrākarṣaṇa-kāriṇī || 168||**

रक्ताशया रक्तभोगा रक्तपूजा-सदारतिः ।

**raktāśayā raktabhogā raktapūjā-sadāratiḥ |**

रक्तपूज्या रक्तहोमा रक्तस्था रक्तवत्सला ॥ १६९ ॥

**raktapūjyā raktahomā raktasthā raktavatsalā || 169||**

रक्तपूर्णा रक्तदेहा रक्तपूजक-पुत्रिणी ।

**raktapūrṇā raktadehā raktapūjaka-putriṇī |**

रक्ताख्या रक्तिनी रक्तसंस्पृहा रक्तसुन्दरी ॥ १७० ॥

**raktākhyā raktinī raktasaṁspṛhā raktasundarī || 170||**

रक्ताभिदेहा रक्तार्हा रक्तवन्दक-वन्दिता ।

**raktābhidehā raktārhā raktavandaka-vanditā |**

महारक्ता रक्त-भवा रक्त-वृष्टि-विधायिनी ॥ १७१ ॥

**mahāraktā rakta-bhavā rakta-vṛṣṭi-vidhāyinī || 171||**

रक्तस्नाता रक्तप्रीता रक्त-सेव्यातिरक्तिनी ।

**raktasnātā raktaprītā rakta-sevyātiraktinī |**

रक्तानन्दकरी रक्त-सदानन्द-विधायिनी ॥ १७२ ॥

**raktānandakarī rakta-sadānanda-vidhāyinī || 172||**

रक्तारक्ता रक्तपूर्णा रक्त-सेव्यक्षिणीरमा ।

**raktāraktā raktapūrṇā rakta-sevyakṣiṇīramā |**

रक्तसेवक-सर्वस्वा रक्तनिन्दक-नाशिनी ॥ १७३ ॥

**raktasevaka-sarvasvā raktanindaka-nāśinī || 173||**

रक्तात्मिका रक्तरूपा रक्ताकर्षण-कारिणी ।

**raktātmikā raktarūpā raktākarṣaṇa-kāriṇī |**

रक्तोत्साहा रक्तव्यग्रा रक्तपान-परायणा ॥ १७४ ॥

**raktotsāhā raktavyagrā raktapāna-parāyaṇā || 174||**

शोणितानन्द-जननी कल्लोल-स्निग्ध-रूपिणी ।

**śoṇitānanda-jananī kallola-snigdha-rūpiṇī |**

साधकान्तर्गता देवी पार्वती पाप-नाशिनी ॥ १७५ ॥

**sādhakāntargatā devī pārvatī pāpa-nāśinī || 175||**

साधूनां-हृदिसंस्थात्री साधकानन्द-कारिणी ।
**sādhūnāṁ-hṛdisaṁsthātrī sādhakānanda-kāriṇī |**
साधकानां च जननी साधक-प्रिय-कारिणी ॥ १७६ ॥
**sādhakānāṁ ca jananī sādhaka-priya-kāriṇī || 176||**

साधक-प्रचुरानन्द-सम्पत्ति-सुख-दायिनी ।
**sādhaka-pracurānanda-sampatti-sukha-dāyinī |**
साधकासाधक-प्राणा साधकासक्त-मानसा ॥ १७७ ॥
**sādhakāsādhaka-prāṇā sādhakāsakta-mānasā || 177||**

साधकोत्तम-सर्वस्वा साधका भक्तरक्तपा ।
**sādhakottama-sarvasvā sādhakā bhaktaraktapā |**
साधकानन्द-सन्तोषा साधकारि-विनाशिनी ॥ १७८ ॥
**sādhakānanda-santoṣā sādhakāri-vināśinī || 178||**

आत्म-विद्या ब्रह्म-विद्या परब्रह्म-कुटुम्बिनी ।
**ātma-vidyā brahma-vidyā parabrahma-kuṭumbinī |**
त्रिकूटस्था पञ्च-कूटा सर्वकूट-शरीरिणी ॥ १७९ ॥
**trikūṭasthā pañca-kūṭā sarvakūṭa-śarīriṇī || 179||**

सर्ववर्णमयी वर्ण-जप-माला-विधायिनी ।
**sarvavarṇamayī varṇa-japa-mālā-vidhāyinī |**
इति श्रीकालिकानाम्नां सहस्रं शिव-भाषितम् ॥ १८० ॥
**iti śrīkālikānāmnāṁ sahasraṁ śiva-bhāṣitam || 180||**

# फल-श्रुतिः

## phala-śrutiḥ

गुह्यात् गुह्यतरं साक्षान्-महापातक-नाशनम् ।
**guhyāt guhyataraṁ sākṣān-mahāpātaka-nāśanam ।**
पूजा-काले निशीथे च सन्ध्ययोरुभयोरपि ॥ १ ॥
**pūjā-kāle niśīthe ca sandhyayorubhayorapi ।। 1।।**

लभते गाणपत्यं स यः पठेत् साधकोत्तमः ।
**labhate gāṇapatyaṁ sa yaḥ paṭhet sādhakottamaḥ ।**
यः पठेत् पाठयेद्वापि शृणोति श्रावयेदपि ॥ २ ॥
**yaḥ paṭhet pāṭhayedvāpi śṛṇoti śrāvayedapi ।। 2।।**

सर्वपाप-विनिर्मुक्तः स याति कालिकापदम् ।
**sarvapāpa-vinirmuktaḥ sa yāti kālikāpadam ।**
श्रद्धयाऽश्रद्धया वापि यः कश्चिन्मानवः पठेत् ॥ ३ ॥
**śraddhayā'śraddhayā vāpi yaḥ kaścinmānavaḥ paṭhet ।। 3।।**

दुर्गाद्दुर्गतरं तीर्त्वा स याति कालिकापदम् ।

**durgāddurgataraṁ tīrtvā sa yāti kālikāpadam ।**

वन्ध्या वा काकवन्ध्या वा मृतपुत्रा चयाङ्गना ॥ ४ ॥

**vandhyā vā kākavandhyā vā mṛtaputrā cayāṅganā ।। 4।।**

श्रुत्वा स्तोत्रमिदं पुत्रान् लभते चिरजीविनः ।

**śrutvā stotramidaṁ putrān labhate cirajīvinaḥ ।**

यं यं कामयते कामं पठन् स्तोत्रमनुत्तमम् ॥ ५ ॥

**yaṁ yaṁ kāmayate kāmaṁ paṭhan stotramanuttamam ।। 5।।**

देवीवरप्रदानेन तं तं प्राप्नोति नित्यशः ।

**devīvarapradānena taṁ taṁ prāpnoti nityaśaḥ ।**

स्वयम्भू-कुसुमैः शुक्लैः सुगन्धि-कुसुमान्वितैः ॥ ६ ॥

**svayambhū-kusumaiḥ śuklaiḥ sugandhi-kusumānvitaiḥ ।। 6।।**

गुरुविष्णु-महेशानामभेदेन-महेश्वरी ।

**guruviṣṇu-maheśānāmabhedena-maheśvarī ।**

समन्ताद्-भावयेन्मन्त्री महेशो नात्र संशयः ॥ ७ ॥

**samantād-bhāvayenmantrī maheśo nātra saṁśayaḥ ।। 7।।**

स शाक्तः शिवभक्तश्च स एव वैष्णवोत्तमः ।

**sa śāktaḥ śivabhaktaśca sa eva vaiṣṇavottamaḥ ।**

सम्पूज्य स्तौति यः कालीमद्वैत-भावमावहन् ॥ ८ ॥

**sampūjya stauti yaḥ kālīmadvaita-bhāvamāvahan ।। 8।।**

देव्यानन्देन सानन्दो देवी भक्त्यैक-भक्तिमान् ।
**devyānandena sānando devī bhaktyaika-bhaktimān |**
स एव धन्यो यस्यार्थे महेशो व्यग्रमानसः ॥ ९ ॥
**sa eva dhanyo yasyārthe maheśo vyagramānasaḥ || 9||**

कामयित्वा यथाकामं स्तवमेनमुदीरयेत् ।
**kāmayitvā yathākāmaṁ stavamenamudīrayet |**
सर्वरोगैः परित्यक्तो जायते मदनोपमः ॥ १० ॥
**sarvarogaiḥ parityakto jāyate madanopamaḥ || 10||**

चक्रं वास्तवमेनं वा धारयेदङ्गसङ्गतम् ।
**cakraṁ vāstavamenaṁ vā dhārayedaṅgasaṅgatam |**
विलिख्य विधिवत् साधुः स एव कालिका-तनुः ॥ ११ ॥
**vilikhya vidhivat sādhuḥ sa eva kālikā-tanuḥ || 11||**

देव्यै निवेदितं यद्यत्तस्यांशं भक्षयेन्नरः ।
**devyai niveditaṁ yadyattasyāṁśaṁ bhakṣayennaraḥ |**
दिव्यदेहधरो भूत्वा देव्याः पार्श्वधरोभवेत् ॥ १२ ॥
**divyadehadharo bhūtvā devyāḥ pārśvadharobhavet || 12||**

नैवेद्य-निन्दकं दृष्ट्वा नृत्यन्ति योगिनीगणाः ।
**naivedya-nindakaṁ dṛṣṭvā nṛtyanti yoginīgaṇāḥ |**
रक्तपानोद्यतास्-सर्वा मांसास्थि-चर्वणोद्यताः ॥ १३ ॥
**raktapānodyatās-sarvā māṁsāsthi-carvaṇodyatāḥ || 13||**

तस्मान्निवेदितं देव्यै दृष्ट्वा श्रृत्वा च मानवः ।

**tasmānniveditaṁ devyai dṛṣṭvā śrṛtvā ca mānavaḥ |**

न निन्देन्-मनसा वाचा कुष्ठव्याधि-पराङ्मुखः ॥ १४ ॥

**na ninden-manasā vācā kuṣṭhavyādhi-parāṅmukhaḥ || 14||**

आत्मानं कालिकात्मानं भावयन् स्तौतियः शिवाम् ।

**ātmānaṁ kālikātmānaṁ bhāvayan stautiyaḥ śivām |**

शिवोपमं गुरुं ध्यात्वा स एव श्रीसदाशिवः ॥ १५ ॥

**śivopamaṁ guruṁ dhyātvā sa eva śrīsadāśivaḥ || 15||**

यस्यालये तिष्ठति नूनमेतत्-

**yasyālaye tiṣṭhati nūnametat-**

स्तोत्रम् भवान्या लिखितं विधिज्ञैः ।

**stotram bhavānyā likhitaṁ vidhijñaiḥ |**

गोरोचनालक्तक-कुङ्कुमाक्त-

**gorocanālaktaka-kuṅkumākta-**

कर्पूरसिन्दूर-मधुद्रवेण ॥ १६ ॥

**karpūrasindūra-madhudraveṇa || 16||**

न तत्र चोरस्य भयं न हास्यो

**na tatra corasya bhayaṁ na hāsyo**

न वैरिभिर्नाऽशनिवह्नि-भीतिः ।

**na vairibhirnā'śanivahni-bhītiḥ |**

उत्पात-वायोरपि नाऽत्रशङ्का

**utpāta-vāyorapi nā'traśaṅkā**

लक्ष्मीः स्वयं तत्र वसेदलोला ॥ १७ ॥

**lakṣmīḥ svayaṁ tatra vasedalolā || 17||**

स्तोत्रं पठेत्तदनन्तपुण्यम्

**stotraṁ paṭhettadanantapuṇyam**

देवी-पदाम्भोजपरो मनुष्यः ।

**devī-padāmbhojaparo manuṣyaḥ |**

विधानपूजा-फलमेव सम्यक्

**vidhānapūjā-phalameva samyak**

प्राप्नोति सम्पूर्ण-मनोरथोऽसौ ॥ १८ ॥

**prāpnoti sampūrṇa-manoratho'sau || 18||**

मुक्ताः श्रीचरणारविन्द-निरताः स्वर्गामिनो भोगिनो

**muktāḥ śrīcaraṇāravinda-niratāḥ svargāmino bhogino**

ब्रह्मोपेन्द्र-शिवात्मकार्चनरता लोकेऽपि संलेभिरे ।

**brahmopendra-śivātmakārcanaratā loke'pi saṁlebhire |**

श्रीमच्छङ्कर-भक्तिपूर्वक-महादेवी-पदध्यायिनो

**śrīmacchaṅkara-bhaktipūrvaka-mahādevī-padadhyāyino**

मुक्तिर्भुक्तिमतिः स्वयं स्तुति-पराभक्तिः करस्थायिनी ॥ १९ ॥

**muktirbhuktimatiḥ svayaṁ stuti-parābhaktiḥ karasthāyinī || 19||**

**॥ इति श्रीकालिकाकुलसर्वस्वे हरपरशुरामसंवादे**

**|| iti śrīkālikākulasarvasve haraparaśurāmasaṁvāde**

**श्रीकालिका-सहस्रनाम-स्तोत्रम् सम्पूर्णम् ॥**

**śrīkālikā-sahasranāma-stotram sampūrṇam ||**